# Shri Jagadamba Stuti

# શ્રીજગદમ્બાસ્તુતિઃ

## Document Information

Text title : jagadambAstutiH 3

File name : jagadambAstutiH3.itx

Category : devii, pArvati

Location : doc_devii

Author : Rajanaka Vidyadhar

Transliterated by : Girdhari Lal Koul glkoul.18 at gmail.com

Proofread by : Girdhari Lal Koul glkoul.18 at gmail.com

Latest update : December 6, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 6, 2019

*sanskritdocuments.org*

# શ્રીજગદમ્બાસ્તુતિઃ

ૐ નમઃ શ્રીજગદમ્બાયૈ ।

ૐ વિશ્વેશ્વરી નિખિલદેવ મહર્ષિપૂજ્યા
સિંહાસના ત્રિનયના ભુજગોપવીતા ।
શઙ્ખામ્બુજાસ્યઽમૃતકુમ્ભક પઞ્ચશાખા
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧॥

જન્માટવી પ્રદહને દવ-વહ્નિ-ભૂતા
તત્પાદ પઙ્કજરજોગત ચેતસાં યા ।
શ્રેયોવતાં સુકૃતિનાં ભવપાશભેત્રી
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૨॥

દેવ્યા યયા દનુજરાક્ષસદુષ્ટ-ચેતો
ન્યગ્ભાવિતં ચરણનૂપુરશિઞ્જિતેન ।
ઇન્દ્રાદિદેવ હૃદયં પ્રવિકાસયન્તી
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૩॥

દુઃખાર્ણવે હિ પતિતં શરણાગતં યા
ચોદ્ધૃ ત્ય સા નયતિ ધામ પરં દયાબ્ધિઃ ।
વિષ્ણુગજેન્દ્રમિવ ભીતભયાપહર્ત્રી
રાજ્ઞી સદા ભગવતી  ભવતુ પ્રસન્ના ॥ ૪॥

યસ્યા વિચિત્રમખિલં હિ જગત્પ્રપઞ્ચં
કુક્ષૌ વિલીનમપિ સૃષ્ટિવિસૃષ્ટિરૂપાત્ ।
આવિર્ભવત્યવિરતં ચિદચિત્સ્વભાવં
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૫॥

યત્પાદ પંઙ્કજરજઃ કણજ પ્રસાદાત્
યોગીશ્વરૈર્વિગત કલ્મષમાનસૈસ્તત્ ।
પ્રાપ્ત પદં જનિવિનાશહરં પરં સા

રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૬॥

યત્પાદપઙ્કજ રજાંસિ મનોમલાનિ
સમ્માર્જયન્તિ શિવવિષ્ણુ વિરિઞ્ચિદેવૈઃ ।
મૃગ્યાન્યઽપશ્ચિમતનોઃ પ્રણુતાનિ માતા
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૭॥

યત્પાદ ચિન્તન દિવાકર રશ્મિમાલા
ચાન્તર્બહિશ્કરણવર્ગ સરોજષણ્ડમ્ ।
જ્ઞાનોદયે સતિ વિકાસ્ય તમોપહર્ત્રી
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૮॥

યદ દર્શનામૃતનદી મહદોઘયુક્તા
સમ્પ્લાવયત્યખિલ ભેદગુહાસ્વઽનન્તા ।
તૃષ્ણાહરા સુકૃતિનાં ભવતાપહર્ત્રી
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૯॥

હંસસ્થિતા સકલશબ્દમયી ભવાની
વાગ્વાદિની હૃદય પુષ્કર ચારિણીયા ।
હંસીવ હંસરજનીશ્વર વહ્નિનેત્રા
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૦॥

યા સોમસૂર્યવપુષા સતતં સરન્તી
મૂલાશ્રયાત્તડિદિવાઽઽવિધરન્ધ્રમીઢયા ।
મધ્યસ્થિતા સકલનાડિસમૂહ પૂર્ણા
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૧॥

ચૈતન્યપૂરિત સમસ્ત જગદ્-વિચિત્રા
માતૃપ્રમેય પરિમાણાતયા ચકાસ્તિ ।
યા પૂર્ણવૃત્યહમિતિ સ્વપદાધિરૂઢા
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૨॥

યા ચિત્ક્રમાક્રમતયા પ્રવિભાતિનિત્યા
સ્વાતન્ત્ર્યશ ક્તિરમલા ગતભેદભાવા ।
સ્વાત્મસ્વરૂપ સુવિમર્શપરૈઃ સુગમ્યા
રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૩॥

યા કૃત્યપઞ્ચક નિભાલન લાલસૈસ્તૈઃ
    સન્દૃશ્યતે નિખિલવેદ્યગતાપિ શશ્વત્ ।
સાન્તર્ધૃતા પરપ્રમાતૃપદં વિશન્તી
    રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૪॥

યાનુત્તરાત્મનિ પદે પરમાઽમૃતાબ્ધૌ
    સ્વાતન્ત્ર્યશક્તિલહરીવ બહિઃ સરન્તી ।
સંલીયતે વરસતઃ સ્વપદે સભાવા
    રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૫॥

મેરોઃ સદૈવ હિ દરીષુવિચિત્રવાગ્ભિઃ
    ગાયન્તિ યાં ભગવતી પરિવાદિનીભિઃ ।
વિદ્યાધરા હિ પુલકાઙ્કિત વિગ્રહાઃ સા
    રાજ્ઞી સદા ભગવતી ભવતુ પ્રસન્ના ॥ ૧૬॥

રાજ્ઞીં સદા ભગવતીં મનસા સ્મરામિ
    રાજ્ઞીં સદા ભગવતીં વચસા ગૃણામિ ।
રાજ્ઞીં સદા ભગવતીં શિરસા નમામિ
    રાજ્ઞીં સદા ભગવતીં શરણં પ્રદદ્યે ॥ ૧૭॥

રાજ્ઞ્યાઃ સ્તોત્રમિન્દ પુણ્યં યઃ પઠેદ્ભક્તિમાન્નરઃ
    નિત્યં દેવ્યાઃ પ્રસાદેન શિવસાયુજ્યમાપ્નુયાત્ ॥ ૧૮॥

શ્રીજગદમ્બાસ્તુતી-રાજાનક-વિદ્યાધર-વિરચિતા
શુભદા બોભૂયાત્ ઇતિ શિવમ્ ॥

જય દેહાદ્રિકુઞ્જાન્તર્નિકૂજઞ્જીવ જીવક ।
જય સન્માનસવ્યોમવિલાસિવર સારસ ॥

Encoded and proofread by Girdhari Lal Koul glkoul.18 at gmail.com

*Shri Jagadamba Stuti*

pdf was typeset on December 6, 2019

Please send corrections to *sanskrit@cheerful.com*